# Saddarshanam

# સદ્દર્શનમ્

## Document Information

Text title : Saddarshanam

File name : saddarshanam.itx

Category : vedanta, misc, sAhitya, upadesha, gaNapati-muni

Location : doc_z_misc_general

Author : Vasishtha Ganapati Muni's Sanskrit version of Ramana Maharshi's Tamil Ulladu Narpadu (Forty Verses on Reality)

Proofread by : Sunder Hattangadi

Description-comments : The Collected Works of Vasishtha Kavyakantha Ganapati Muni Vol 04-12

Latest update : July 8, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સદ્દર્શનમ્

શ્રીભગવદ્રમણમહર્ષિ-વિરચિત-દ્રાવિડગ્રન્થસ્ય
સંસ્કૃતાનુવાદાત્મકમ્
મઙ્ગલમ્
સત્પ્રત્યયાઃ કિં નુ વિહાય સન્તં
હૃદ્યેષ ચિન્તારહિતો હૃદાખ્યઃ ।
કથં સ્મરામસ્તમમેયમેકં
તસ્ય સ્મૃતિસ્તત્ર દૃઢૈવ નિષ્ઠા ॥ ૧ ॥

મૃત્યુઞ્જયં મૃત્યુભિયાશ્રિતાના-
મહંમતિર્મૃત્યુમુપૈતિ પૂર્વમ્ ।
અથ સ્વભાવાદમૃતેષુ તેષુ
કથં પુનર્મૃત્યુધિયોઽવકાશઃ ॥ ૨ ॥

ગ્રન્થારમ્ભઃ
સર્વૈર્નિદાનં જગતોઽહમશ્ચ
વાચ્યઃ પ્રભુઃ કશ્ચિદપારશક્તિઃ ।
ચિત્રેઽત્ર લોક્યં ચ વિલોકિતા ચ
પટઃ પ્રકાશોઽપ્યભવત્સ એકઃ ॥ ૩॥

તત્ત્વગ્રન્થમાલા
આરભ્યતે જીવજગત્પરાત્મ-
તત્ત્વાભિધાનેન મતં સમસ્તમ્ ।
ઇદં ત્રયં યાવદહંમતિ સ્યાત્
સર્વોત્તમાઽહંમતિશૂન્યનિષ્ઠા ॥ ૪॥

સત્યં મૃષા વા ચિદિદં જડં વા
દુઃખં સુખં વેતિ મુધા વિવાદઃ ।
અદૃષ્ટલોકા નિરહંપ્રતીતિ-

ર્નિષ્ઠાઽવિકલ્પા પરમાઽખિલેષ્ટા ॥ ૫॥

સરૂપબુદ્ધિર્જગતીશ્વરે ચ
સરૂપધીરાત્મનિ યાવદસ્તિ ।
અરૂપકાત્મા યદિ કઃ પ્રપશ્યેત્
સા દૃષ્ટિરેકાઽનવધિર્હિ પૂર્ણા ॥ ૬॥

યત્પઞ્ચકોશાત્મકમસ્તિ દેહં
તદન્તરા કિં ભુવનં ચકાસ્તિ ।
દેહં વિના પઞ્ચવિધં તદેતત્
પશ્યન્તિ કે વા ભુવનં ભણન્તુ ॥ ૭॥

શબ્દાદિરૂપં ભુવનં સમસ્તં
શબ્દાદિસત્તેન્દ્રિયવૃત્તિભાસ્યા ।
સત્તેન્દ્રિયાણાં મનસો વશે સ્યાત્
મનોમયં તદ્ભુવનં વદામઃ ॥ ૮॥

ધિયા સહોદેતિ ધિયાસ્તમેતિ
લોકસ્તતો ધીપ્રવિભાસ્ય એષઃ ।
ધીલોકજન્મક્ષયધામ પૂર્ણં
સદ્વસ્તુ જન્મક્ષયશૂન્યમેકમ્ ॥ ૯॥

ભવન્તુ સદ્દર્શનસાધનાનિ
પરસ્ય નામાકૃતિભિઃ સપર્યા ।
સદ્વસ્તુનિ પ્રાપ્તદાત્મભાવા
નિષ્ઠૈવ સદ્દર્શનમિત્યવેહિ ॥ ૧૦॥

દ્વન્દ્વાનિ સર્વાણ્યખિલાસ્ત્રિપુટ્યઃ
કિઞ્ચિત્સમાશ્રિત્ય વિભાન્તિ વસ્તુ ।
તન્માર્ગણે સ્યાદ્ગલિતં સમસ્તં
ન પશ્યતાં સચ્ચલનં કદાપિ ॥ ૧૧॥

વિદ્યા કથં ભાતિ ન ચેદવિદ્યા
વિદ્યાં વિના કિં પ્રવિભાત્યવિદ્યા ।
દ્વયં ચ કસ્યેતિ વિચાર્ય મૂલ-
સ્વરૂપનિષ્ઠા પરમાર્થવિદ્યા ॥ ૧૨॥

બોદ્ધારમાત્માનમજાનતો યો
બોધઃ સ કિં સ્યાત્પરમાર્થબોધઃ ।
બોધસ્ય બોધ્યસ્ય ચ સંશ્રયં સ્વં
વિજાનતસ્તદ્દ્વિતયં વિનશ્યેત્ ॥ ૧૩॥

નિદ્રા ન વિદ્યા ગ્રહણં ન વિદ્યા
ગૃહ્ણાતિ કિઞ્ચિન્ન યથાર્થબોધે ।
નિદ્રાપદાર્થગ્રહણેતરા સ્યાત્
ચિદેવ વિદ્યા વિલસન્ત્યશૂન્યા ॥ ૧૪॥

સત્યશ્ચિદાત્મા વિવિધાકૃતિશ્ચિત્
સિધ્યેત્પૃથક્સત્યચિતો ન ભિન્ના ।
ભૂષાવિકારાઃ કિમુ સન્તિ સત્યં
વિના સુવર્ણં પૃથગત્ર લોકે ॥ ૧૫॥

તદ્યુષ્મદોરસ્મદિ સમ્પ્રતિષ્ઠા
તસ્મિન્ વિનષ્ટેઽસ્મદિ મૂલબોધાત્ ।
તદ્યુષ્મદસ્મન્મતિવર્જિતૈકા
સ્થિતિર્જ્વલન્તી સહજાત્મનઃ સ્યાત્ ॥ ૧૬॥

ભૂતં ભવિષ્યચ્ચ ભવત્સ્વકાલે
તદ્વર્તમાનસ્ય વિહાય તત્ત્વમ્ ।
હાસ્યા ન કિં સ્યાદ્ગતભાવિચર્ચા
વિનૈકસઙ્ખ્યાં ગણનેવ લોકે ॥ ૧૭॥

ક્વ ભાતિ દિક્કાલકથા વિનાઽસ્માન્
દિક્કાલલીલેહ વપુર્વયં ચેત્ ।
ન ક્વાપિ ભામો ન કદાપિ ભામો
વયં તુ સર્વત્ર સદા ચ ભામઃ ॥ ૧૮॥

દેહાત્મભાવે જ્ઞજડૌ સમાના-
વેકસ્ય દેહે હૃદિ દીપ્ત આત્મા ।
આક્રમ્ય દેહં ચ જગચ્ચ પૂર્ણઃ
પરસ્ય મેયં તનુમાત્રમાત્મા ॥ ૧૯॥

અજ્ઞસ્ય વિજ્ઞસ્ય ચ વિશ્વમસ્તિ
પૂર્વસ્ય દૃશ્યં જગદેવ સત્યમ્ ।

પરસ્ય દૃશ્યાશ્રયભૂતમેકં
સત્યં પ્રપૂર્ણં પ્રવિભાત્યરૂપમ્ ॥ ૨૦॥

વિધેઃ પ્રયત્નસ્ય ચ કોઽપિ વાદ-
સ્તયોર્દ્વયોર્મૂલમજાનતાં સ્યાત્ ।
વિધેઃ પ્રયત્નસ્ય ચ મૂલવસ્તુ
સઞ્જાનતાં નૈવ વિધિર્ન યત્નઃ ॥ ૨૧॥

યદીશિતુર્વીક્ષણમીક્ષિતાર-
મવીક્ષ્ય તન્માનસિકેક્ષણં સ્યાત્ ।
ન દ્રષ્ટુરન્યઃ પરમો હિ તસ્ય
વીક્ષા સ્વમૂલે પ્રવિલીય નિષ્ઠા ॥ ૨૨॥

આત્માનમીક્ષેત પરં પ્રપશ્યે-
દિત્યાગમોક્તેઃ સુલભો ન ભાવઃ ।
નાત્મૈવ દૃશ્યો યદિ કા કથેશે
સ્વયં તદન્નીભવનં તદીક્ષા ॥ ૨૩॥

ધિયે પ્રકાશં પરમો વિતીર્ય
સ્વયં ધિયોઽન્તઃ પ્રવિભાતિ ગુપ્તઃ ।
ધિયં પરાવર્ત્ય ધિયોન્તરેઽત્ર
સંયોજનાન્નેશ્વરદૃષ્ટિરન્યા ॥ ૨૪॥

ન વક્તિ દેહોઽહમિતિ પ્રસુપ્તૌ
ન કોઽપિ નાભૂવમિતિ પ્રવક્તિ ।
યત્રોદિતે સર્વમુદેતિ તસ્ય
ધિયાઽહમઃ શોધય જન્મદેશમ્ ॥ ૨૫॥

દેહો ન જાનાતિ સતો ન જન્મ
દેહપ્રમાણોઽન્ય ઉદેતિ મધ્યે ।
અહઙ્કૃતિગ્રન્થિવિબન્ધસૂક્ષ્મ-
શરીરચેતોભવજીવનામા ॥ ૨૬॥

રૂપોદ્ભવો રૂપતતિપ્રતિષ્ઠો
રૂપાશનો ધૂતગૃહીતરૂપઃ ।
સ્વયં વિરૂપઃ સ્વવિચારકાલે
ધાવત્યહઙ્કારપિશાચ એષઃ ॥ ૨૭॥

ભાવેઽહમઃ સર્વમિદં વિભાતિ
લયેઽહમો નૈવ વિભાતિ કિઞ્ચિત્।
તસ્માદહંરૂપમિદં સમસ્તં
તન્માર્ગણં સર્વજયાય માર્ગઃ ॥ ૨૮॥

સત્યા સ્થિતિર્નાહમુદેતિ યત્ર
તચ્ચોદયસ્થાનગવેષણેન ।
વિના ન નશ્યેદ્યદિ તન્ન નશ્યેત્
સ્વાત્મૈક્યરૂપા કથમસ્તુ નિષ્ઠા ॥ ૨૯॥

કૂપે યથા ગાઢજલે તથાન્ત-
ર્નિમજ્જ્ય બુદ્ધ્યા શિતયા નિતાન્તમ્ ।
પ્રાણં ચ વાચં ચ નિયમ્ય ચિન્વન્
વિન્દેન્નિજાહઙ્કૃતિમૂલરૂપમ્ ॥ ૩૦॥

મૌનેન મજ્જન્મનસા સ્વમૂલ-
ચર્ચૈવ સત્યાત્મવિચારણં સ્યાત્ ।
એષોઽહમેતન્ન મમ સ્વરૂપ-
મિતિ પ્રમા સત્યવિચારણાઙ્ગમ્ ॥ ૩૧॥

ગવેષણાત્પ્રાપ્ય હૃદન્તરં તત્
પતેદહન્તા પરિભુગ્નશીર્ષા ।
અથાહમન્યત્સ્ફુરતિ પ્રકૃષ્ટં
નાહઙ્કૃતિસ્તત્પરમેવ પૂર્ણમ્ ॥ ૩૨॥

અહઙ્કૃતિં યો લસતિ ગ્રસિત્વા
કિં તસ્ય કાર્યં પરિશિષ્ટમસ્તિ ।
કિઞ્ચિદ્વિજાનાતિ સ નાત્મનોઽન્યત્
તસ્ય સ્થિતિં ભાવયિતું ક્ષમઃ કઃ ॥ ૩૩॥

આહ સ્ફુટં તત્ત્વમસીતિ વેદ-
સ્તથાપ્યસમ્પ્રાપ્ય પરાત્મનિષ્ઠામ્ ।
ભૂયો વિચારો મતિદુર્બલત્વં
તત્સર્વદા સ્વાત્મતયા હિ ભાતિ ॥ ૩૪॥

ન વેદ્મ્યહં મામુત વેદ્મ્યહં મા-

મિતિ પ્રવાદો મનુજસ્ય હાસ્યઃ ।
દૃગ્દૃશ્યભેદાત્ કિમયં દ્વિધાત્મા
સ્વાત્મૈકતાયાં હિ ધિયાં ન ભેદાઃ ॥ ૩૫॥

હૃત્પ્રાપ્ય સદ્ધામ નિજસ્વરૂપે
સ્વભાવસિદ્ધેઽનુપલભ્ય નિષ્ઠામ્ ।
માયાવિલાસઃ સદસત્સરૂપ-
વિરૂપનાનૈકમુખપ્રવાદાઃ ॥ ૩૬॥

સિદ્ધસ્ય વિત્તિઃ સત એવ સિદ્ધિઃ
સ્વપ્નોપમાનાઃ ખલુ સિદ્ધયોઽન્યાઃ ।
સ્વપ્નઃ પ્રબુદ્ધસ્ય કથં નુ સત્યઃ
સતિ સ્થિતઃ કિં પુનરેતિ માયામ્ ॥ ૩૭॥

સોઽહંવિચારો વપુરાત્મભાવે
સાહાય્યકારી પરમાર્ગણસ્ય ।
સ્વાત્મૈક્યસિદ્ધૌ સ પુનર્નિરર્થો
યથા નરત્વપ્રમિતિર્નરસ્ય ॥ ૩૮॥

દ્વૈતં વિચારે પરમાર્થબોધે
ત્વદ્વૈતમિત્યેષ ન સાધુવાદઃ ।
ગવેષણાત્પ્રાગ્દશમે વિનષ્ટે
પશ્ચાચ્ચ લબ્ધે દશમત્વમેકમ્ ॥ ૩૯॥

કરોમિ કર્મેતિ નરો વિજાનન્
બાધ્યો ભવેત્કર્મફલં ચ ભોક્તુમ્ ।
વિચારધૂતા હૃદિ કર્તૃતા ચેત્
કર્મત્રયં નશ્યતિ સૈવ મુક્તિઃ ॥ ૪૦॥

બદ્ધત્વભાવે સતિ મોક્ષચિન્તા
બન્ધસ્તુ કસ્યેતિ વિચારણેન ।
સિદ્ધે સ્વયં સ્વાત્મનિ નિત્યમુક્તે
ક્વ બન્ધચિન્તા ક્વ ચ મોક્ષચિન્તા ॥ ૪૧॥

રૂપિણ્યરૂપિણ્યુભયાત્મિકા ચ
મુક્તિસ્ત્રિરૂપેતિ વિદો વદન્તિ ।
ઇદં ત્રયં યા વિવિનક્ત્યહન્ધી-

સ્તસ્યાઃ પ્રણાશઃ પરમાર્થમુક્તિઃ ॥ ૪૨ ॥

સદ્દર્શનં દ્રાવિડવાઙ્નિબદ્ધં
મહર્ષિણા શ્રીરમણેન શુદ્ધમ્ ।
પ્રબન્ધમુત્કૃષ્ટમમર્ત્યવાણ્યા-
મનૂદ્ય વાસિષ્ઠમુનિર્વ્યતાનીત્ ॥ ૪૩ ॥

સત્તત્ત્વસારં સરલં દધાના
મુમુક્ષુલોકાય મુદં દદાના ।
અમાનુષશ્રીરમણીયવાણી-
મયૂખભિત્તિર્મુનિવાગ્ વિભાતિ ॥ ૪૪ ॥

॥ સદ્દર્શનં સમાપ્તમ્ ॥

Proofread by Sunder Hattangadi

---

*Saddarshanam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*